# Rudraksha Mahatmyam

# રુદ્રાક્ષમાહાત્મ્યમ્

## Document Information

Text title : Rudraksha Mahatmyam

File name : rudrAkShamAhAtmyam.itx

Category : shiva, mAhAtmya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Latest update : February 17, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 18, 2025

*sanskritdocuments.org*

# રુદ્રાક્ષમાહાત્મ્યમ્

રુદ્રાક્ષે પ્રજપન્મંત્ર પુણ્ય કોટિગુણં ભવેત્ ।
દશકોટિગુણં પુણ્યં ધારણાલ્લભતે નરઃ ॥

## અથાનુક્રમાણિકા ।

૧-૨ મઙ્ગલાચરણમ્ , ગ્રન્થપ્રશંસા
૩-૪ રુદ્રાક્ષોત્પત્તિઃ
૫ માલાધારણાધિકારી
૬-૧૦ શિવનામવિભૂતિરુદ્રાક્ષમાહાત્મ્યમ્
૧૧ રુદ્રાક્ષમાહાત્મ્યે સૂતવચનમ્
૧૨-૧૮ એકાદશશતરુદ્રાક્ષધારણમાહાત્મ્યમ્
૧૯-૨૩ એકાદશશતધારણાભાવેઽન્યપ્રકારઃ
૨૪ ગુરુલઘુરુદ્રાક્ષમાહાત્મ્યમ્
૨૫ અતિલઘુરુદ્રાક્ષમાહાત્મ્યમ્
૨૬ રુદ્રાક્ષાણાં સર્વફલાધિક્યકથનમ્
૨૭-૨૮ સર્વમાલાતો રુદ્રાક્ષમાલાયા: શ્રેષ્ઠત્વમ્
૨૯ એકમુખીરુદ્રાક્ષપરીક્ષા
૩૦-૪૫ એકમુખાદારભ્ય ચતુર્દશમુખપર્યન્તમાહાત્મ્યમ્
૪૬ ગૌરીશઙ્કરરુદ્રાક્ષમાહાત્મ્યમ્
૪૭ પાર્વતી પ્રતિ શિવકથનમ્
૪૮ સર્વદેવતાજાપ્યેરુદ્રાક્ષમાલાયાઃશ્રેષ્ઠત્વમ્
૪૯ સ્થૂલરુદ્રાક્ષોત્પત્તિસ્થાનમ્
૫૦ લઘુરુદ્રાક્ષોપત્તિસ્થાનમ્
૫૧-૫૨ રુદ્રાક્ષશ્રવણમાહાત્મ્યમ્

# રુદ્રાક્ષમાહાત્મ્યમ્ ।

શ્રીગણેશાય નમઃ ।

નત્વા ગણેશં સગણં મહેશં શ્રીશારદાં સર્વગુણપ્રદાત્રીમ્ ।
રુદ્રાક્ષસારં સકલાર્થમૂલં પ્રેમ્ણાવૃતો પ્રેમપુરી તુ ચક્રે ॥ ૧॥

સર્વાર્થસાધને મૂલં રુદ્રાક્ષં પરમં મતમ્ ।
ઇતિ જ્ઞાત્વા મયા સમ્યક્ ગૃહ્યતે પરમાદરાત્॥ ૨॥

અથ યદુક્તં રુદ્રાક્ષજાબાલોપનિષદિ અથર્વવેદે -

અથ હૈનં કાલાગ્નિરુદ્રં ભુસુણ્ડઃ પપ્રચ્છ કથં રુદ્રાક્ષોત્પત્તિઃ
તદ્ધરણાત્કિં ફલામિતિ તં હોવાચ ભગવાન્ કાલાગ્નિરુદ્રઃ
ત્રિપુરવધાર્થમહં નિમીલિતાક્ષોઽભવં તેભ્યો જલબિન્દવો ભૂમૌ
પતિતાસ્તે રુદ્રાક્ષા જાતાઃ । સર્વાનુગ્રહાર્થાય તેષાં નામોચ્ચારણ
માત્રેણ દશગોપ્રદાનફલં દર્શનસ્પર્શનાભ્યાં દ્વિગુણં ફલમત
ઊર્ધ્વં વક્તું ન શક્નોમિ ॥ ૩॥

અથ કાલાગ્નિરુદ્રં ભગવન્તં સનત્કુમારઃ પપ્રચ્છાઽધીહિ
ભગવન્ રુદ્રાક્ષધારણવિધિં તસ્મિન્સમયે નિદાઘજડભરત -
દત્તાત્રેયકાત્યાયનકપિલવસિષ્ઠપિપ્પલાદયશ્ચ કાલાગ્નિરુદ્રઃ
કિમર્થં ભવતામાગમનમિતિ હોવાચ રુદ્રાક્ષધારણવિધિં સર્વે
શ્રોતુમિચ્છામહ ઇતિ અથ કાલાગ્નિરુદ્રઃ પ્રોવાચ રુદ્રસ્ય
નયનાદુત્પન્ના રુદ્રાક્ષા ઇતિ લોકે ખ્યાયન્તે ॥ ૪॥

દેવી ભાગવતે -

સર્વાશ્રમાણાં વર્ણાનાં સ્ત્રીશૂદ્રાણાં શિવાજ્ઞયા ।
ધાર્યાઃ સદૈવ રુદ્રાક્ષા યતીનાં પ્રણવેન હિ ॥ ૫॥

શિવપુરાણે -

શિવનામ વિભૂતિશ્ચ રુદ્રાક્ષાસ્ત્રિતયાઃ શુભાઃ ।
એતત્ત્રયં શરીરે ચ યસ્ય તિષ્ઠતિ નિત્યશઃ ॥ ૬॥

(variation)
શિવનામવિભૂતિશ્ચ તથા રુદ્રાક્ષ એવ ચ ।
એતત્ત્રયં મહાપુણ્યં ત્રિવેણીસદૃશં સ્મૃતમ્ ॥

એતત્ત્રયં શરીરે ચ યસ્ય તિષ્ઠતિ નિત્યશઃ ।
તસ્યૈવ દર્શનં લોકે દુર્લભં પાપહારકમ્ ॥

શરીરે ચ ત્રયં યસ્ય તત્ફલં ચૈકતઃ સ્મૃતમ્ (સ્થિતમ્) ।
એકતો વેણિકાયાશ્ચ દર્શનેન ફલન્તુ યત્ ॥ (variation)
એકતો વેણિકાયાશ્ચ સ્નાનજં તુ ફલં બુધૈઃ ॥ ૭॥

તદેવં તુલિતં પૂર્વં બ્રહ્મણા હિતકારિણા ।
સમતાં (સમાનં) ચૈવ તદ્ધાતં (તજ્જાતં)
તસ્માદ્ધાર્ય્યં (તસ્માદ્ધાર્યં) સદા બુધૈઃ ॥ ૮॥

તદ્દિનં હિ સમારભ્ય બ્રહ્માદિભિઃ પુરાતનૈઃ (બ્રહ્મવિષ્ણ્વાદિભિઃ સુરૈઃ) ।
ધાર્ય્યતે (ધાર્યતે) ત્રિતયં તચ્ચ દર્શનાત્પાપહારકમ્ ॥ ૯॥

દેવીભાગવતે -

this Śloka rather occurs in ŚivaMahāPurāṇam

રુદ્રાક્ષેણ જપન્મન્ત્રં પુણ્ય કોટિગુણં ભવેત્ ।
દશકોટિગુણં પુણ્યં ધારણાલ્લભતે નરઃ ॥ ૧૦॥

શિવપુરાણે -

તન્માહાત્મ્યં વિશેષેણ વક્તુમર્હસિ તત્ત્વતઃ ।
ઇત્યેવં વચનં શ્રુત્વા સૂતો વચનમબ્રવીત્ ॥ ૧૧॥

સમ્યક્ પૃષ્ટમૃષિશ્રેષ્ઠાઃ કથયામિ પુરાતનમ્ । (??)
રુદ્રસંખ્યાશતં ધૃત્વા રુદ્રરૂપો ભવેન્નરઃ ॥ ૧૨॥

પઞ્ચભિશ્ચ શતૈશ્ચૈવ શતાર્ધેન તથા પુનઃ । (??)
રચિત્વા મુકુટં યો વૈ ધારયેત્સ શિવસ્તથા ॥ ૧૩॥ (??)

ત્રિભિશ્ચૈવ શતૈઃ પ્રોક્તં ષષ્ટ્યા યુક્તૈર્મુનીશ્વરાઃ । (??)
ઉપવીતં ત્રિરાવૃત્તં તથા તસ્ય તથા પુનઃ ॥ ૧૪॥ (??)

શિખાયાં ચ તથા પ્રોક્તં ત્રયં વૈ ઋષિસત્તમાઃ।
કર્ણયોઃ પઞ્ચ ષટ્ ચૈવ દક્ષિણોત્તરયોસ્તથા ॥ ૧૫॥

(variation):
શિખાયાં ચ ત્રયં પ્રોક્તં રુદ્રક્ષાણાં મહેશ્વરિ ।
કર્ણયોઃ ષટ્ ચ ષટ્ચૈવ વામદક્ષિણયોસ્તથા ॥

શતમેકોત્તરં કણ્ઠે બાહ્વોશ્ચ (બાહ્વોર્વૈ) રુદ્રસઙ્ખ્યયા ।
કર્ણયોર્ધારયેત્તત્ર (કૂર્પરદ્વારયોસ્તત્ર) મણિબન્ધે તથા પુનઃ ॥ ૧૬॥

ઉપવીતે ત્રયં ધાર્ય્યં (ધાર્યં) મુક્તિકામી ભવેન્નરઃ (શિવભક્તિરતૈર્નરૈઃ) ।
શેષાશ્ચોર્વરિતાશ્ચૈવ પઞ્ચાશન્મુનિસત્તમાઃ ॥ ૧૭॥ (??)
(શેષાનુર્વરિતાન્પઞ્ચ સમ્મિતાન્ધારયેત્કટૌ) ॥

કટિસૂત્રં તથા કૃત્વા નાભૌ ચ ધારયેદ્બુધઃ । (??)
એવં સઙ્ખ્યા ધૃતા યેન સ શિવો નાત્ર સંશયઃ ॥ ૧૮॥ (??)

દેવીભાગવતે - (??)
these Śloka rather occur in ŚivaMahāPurāṇam

શતાધિકસહસ્રસ્ય વિધિરેષઃ પ્રકીર્તિતઃ ।
તદભાવે પ્રકારોન્યઃ શુભઃ સમ્પ્રોચ્યતે મયા ॥ ૧૯॥

એકં શિખાયાં રુદ્રાક્ષં ચત્વારિંશત્તુ મસ્તકે ।
દ્વાત્રિંશત્કણ્ઠદેશે તુ વક્ષસ્યષ્ટોત્તરં શતમ્ ॥ ૨૦॥

એકૈકં કર્ણયોઃ ષટ્ષડ્બાહ્વોઃ ષોડશષોડશ ।
કરયો રવિમાનેન દ્વિગુણેન મુનીશ્વર ॥ ૨૧॥

સઙ્ખ્યા પ્રીતિધૃતા યેન સોઽપિ શૈવજનઃ પરઃ ।
શિવવત્પૂજનીયો વૈ વંદ્યસ્સર્વૈરભીક્ષ્ણશઃ ॥ ૨૨॥

તત્સર્વં ચ મયા ખ્યાતં (સમાખ્યાતં) યત્પૃષ્ટં હિ મુનીશ્વરાઃ ।
ભસ્મરુદ્રાક્ષમાહાત્મ્યં સર્વકામસમૃદ્ધિદમ્ ॥ ૨૩॥

ધાત્રીફલસમં યત્સ્યાત્સર્વારિષ્ટવિનાશનમ્ ।
ગુઞ્જયા સદૃશં યત્સ્યાત્સર્વાર્થફલદાયકમ્ ॥ ૨૪॥

શિવપુરાણે -

યથા યથા લઘુઃ સ્યાદ્વૈ તથાતથાઽધિકં ફલમ્ ।
(યથા યથા લઘુઃ સ્યાદ્વૈ તથાધિકફલપ્રદમ્ ।)
એકૈકસ્ય (એકૈકતઃ) ફલં પ્રોક્તં દશાંશૈરધિકં બુધૈઃ ॥ ૨૫॥

સર્વેષ્વપિ ચ બીજેષુ દૃશ્યતે વિવિધાઙ્કુરઃ । (??)
રુદ્રાક્ષબીજકે સૃષ્ટા દૃશ્યતે ભક્તિરુત્તમા ॥ ૨૬॥ (??)

પરાશરે ગૌતમોક્તમ્ -

શતં ચ શઙ્ખમણિભિઃ પ્રવાલૈશ્ચ સહસ્રકમ્ ।
સ્ફાટિકૈર્દશસાહસ્રં મૌક્તિકૈર્લક્ષમુચ્યતે ॥ ૨૭॥

પદ્માક્ષૈર્દશલક્ષન્તુ સૌવર્ણૈઃ કોટિરુચ્યતે ।
કુશગ્રન્થ્યા ચ રુદ્રાક્ષૈરનન્તફલમશ્નુતે ॥ ૨૮॥

શિવપુરાણે -

ચિહ્નૈરેતૈઃ શુભા જ્ઞેયા પ્રેક્ષાવદ્ભિર્મુનીશ્વરાઃ । (??)
એકમુખી ચ યા સ્યાદ્વૈ પ્રતિપૂરં વ્રજેદિહ ॥ ૨૯॥ (??)

એકમુખી ભવેદ્યા વૈ સર્વસિદ્ધિપ્રદાયિની । (??)
સિદ્ધયોઽષ્ટૌ ચ તત્રૈવ યત્ર સ્યાચ્છુભદા ચ સા ॥ ૩૦॥ (??)

અથર્વવેદે (રુદ્રાક્ષજાબાલોપનિષતે) -

એકવક્ત્રં તુ રુદ્રાક્ષં પરતત્ત્વસ્વરૂપકમ્ ।
તદ્ધારણાત્પરે તત્ત્વે લીયતે વિજિતેન્દ્રિય ॥ ૩૧॥

દ્વિવક્ત્રં તુ મુનિશ્રેષ્ઠ ચાર્દ્ધનારીશ્વરાત્મકમ્ ।
ધારણાદર્ધનારીશઃ પ્રીયતે તસ્ય નિત્યશઃ ॥ ૩૨॥

ત્રિમુખઞ્ચૈવ રુદ્રાક્ષં અગ્નિત્રયસ્વરૂપકમ્ ।
તદ્ધારણાચ્ચ હુતભુક્ તસ્ય તુષ્યતિ નિત્યશઃ ॥ ૩૩॥

ચતુર્મુખં તુ રુદ્રાક્ષં ચતુર્વક્ત્રસ્વરૂપકમ્ ।
તદ્ધારણાચ્ચતુર્વક્ત્રઃ પ્રીયતે તસ્ય નિત્યદા ॥ ૩૪॥ (ચતુર્વક્ત્રં ?)

પઞ્ચમુખી (પઞ્ચવક્ત્રં) તુ રુદ્રાક્ષં પઞ્ચબ્રહ્મસ્વરૂપકમ્ ।
પઞ્ચવક્ત્રઃ સ્વયં બ્રહ્મ પુરુહત્યાં (પુંહત્યાં) વ્યપોહતિ ॥ ૩૫॥

ષડ્વક્ત્રમપિ રુદ્રાક્ષં કાર્તિકેયાધિદૈવતમ્ ।
તદ્ધારણાન્મહાશ્રીસ્સ્યાન્મહદારોગ્યમુત્તમમ્ ॥ ૩૬॥

સપ્તવક્ત્રં તુ રુદ્રાક્ષં સપ્તમાત્રાધિદૈવતમ્ ।
તદ્ધારણાન્મહાશ્રીસ્સ્યાન્મહદારોગ્યમુત્તમમ્ ॥ ૩૭॥

અષ્ટવક્ત્રં તુ રુદ્રાક્ષમષ્ટમાત્રાધિદૈવતમ્ ।
વસ્વષ્ટકપ્રિયં ચૈવ ગઙ્ગાપ્રીતિકરં તથા ॥ ૩૮॥

નવવક્ત્રં તુ રુદ્રાક્ષં નવશક્ત્યધિદૈવતમ્ ।
તસ્ય ધારણમાત્રેણ તુષ્યન્તિ નવશક્તયઃ ॥ ૩૯॥

દશવક્ત્રં તુ રુદ્રાક્ષં યમદૈવત્યમીરિતમ્ ।
દર્શાત્પ્રશાન્તિજનકં ધારણાન્નાત્ર સંશયઃ ॥ ૪૦॥

એકાદશમુખં ત્વક્ષં રુદ્રૈકાદશદૈવતમ્ ।
તદિદં દૈવતં પ્રાહુસ્સદા સૌભાગ્યવર્ધનમ્ ॥ ૪૧॥

રુદ્રાક્ષં દ્વાદશમુખં મહાવિષ્ણુસ્વરૂપકમ્ ।
દ્વાદશાદિત્યરૂપં ચ બિભર્ત્યેવ હિ તત્પરમ્ ॥ ૪૨॥

ત્રયોદશમુખં ત્વક્ષં કામદં સિદ્ધિદં શુભમ્ ।
તસ્ય ધારણમ્રાત્રેણ કામદેવઃ પ્રસીદતિ ॥ ૪૩॥

ચતુર્દશમુખં ચાક્ષં સર્વદા સિદ્ધિદાયકમ્ ।
(ચતુર્દશમુખં ચાક્ષં રુદ્રનેત્રસમુદ્ભવમ્ ।)
સર્વવ્યાધિહરં ચૈવ સર્વદારોગ્યમુત્તમમ્ ॥ ૪૪॥

(સર્વવ્યાધિહરં ચૈવ સર્વદાઽઽરોગ્યમાપ્નુયાત્ ॥)

- -

ચતુર્દશાખ્યપર્યન્તં માહાત્મ્યં લિખિતં મયા । (??)
એકવિંશમુખાન્તઞ્ચ પુરાણે શ્રૂયતેઽખિલમ્ ॥ ૪૫॥ (??)

ગૌરીશઙ્કરરુદ્રાક્ષં તદેવ પ્રિયદૈવતમ્ । (??)
ધારણાત્સુખસમ્પત્તિર્મહદારોગ્યમુત્તમમ્ ॥ ૪૬॥ (??)

- -

દેવીભાગવતે -

ઇત્યુક્તં ગિરિજાગ્રે હિ શિવેન પરમાત્મના । (line occurs in ŚivaMahāPurāṇam )

(lines hereafter seem to be composed by the author)
ખલુ રુદ્રાક્ષભેદા હિ પ્રોક્તા વૈ મુખભેદતઃ ॥ ૪૭॥

વિષ્ણોરપિ ચ ભક્તશ્ચ જપે કુર્યાત્તથૈવ ચ ।
વસ્તુતઃ સર્વદેવાનાં જાપ્યે મુખ્યા ઉદાહૃતા ॥ ૪૮॥

સ્થૂલાક્ષદેશં જગતિ પ્રસિદ્ધં નૈપાલનામ્ના ભુવિ મુખ્યદેશમ્ ।

યત્રોદ્ભવા સર્વનરાશ્ચનાર્યઃ શિવપ્રિયાઃ શૈવજનાનુરક્તાઃ ॥ ૪૯॥

અગસ્ત્યસંસેવિતદક્ષિણાં દિશં જાવાપ્રસિદ્ધં ખલુ જન્મધામ ।
રુદ્રાક્ષદેશગ્ચણકેન તુલ્યં શિવપ્રિયં શૈવજનાનુગમ્યમ્ ॥ ૫૦॥

એવં યઃ શૃણુયાન્નિત્યં માહાત્મ્યં પરમં શુભમ્ ।
લભેત્પરત્ર સમ્મોક્ષં શિવસ્યાતિપ્રિયો ભવેત્ ॥ ૫૧॥

સમાપ્તા ચેયં વૈ નિખિલવિધરુદ્રાક્ષમહિમા
ઇમાં જ્ઞાત્વા સમ્યક્ બહુવિધસુખં યાતિ મનુજઃ ।
અતઃ સ્વાન્તે ધાર્યા હરિહરસમારાધનપરૈઃ
કૃતં ત્વેતત્સર્વં સકલજનપ્રેમાર્થપુરિણા ॥ ૫૨॥

ઇતિ શ્રીપ્રેમપુરીરચિતરુદ્રાક્ષમાહાત્મ્યં સમ્પૂર્ણમ્ ॥

(??) is marked against the lines that could not be traced to; or were found to vary, wrt the Purāṇa cited in the source text. The original text from the Purāṇa has been added against some lines for convenience of readers.

Some Śloka-s that are attributed to DeviBhāgavatam in the source texts, were indeed found in śivaMahāPurāṇam (mostly in Vidyeśvara Saṁhitā Chapters 23 and 25). It was observed that much text wrt Rudrākśa that is mentioned in śivaMahāPurāṇam and DeviBhāgavatam is found in RudrākṣaJābālopaniṣat.

The mention of Atharvaveda (in the source text) implies that the text is from the Atharvadedīya Upaniṣat viz. RudrākṣaJābālopaniṣat.

Readers are advised to cross-check all lines and trace them to the Purāṇa and Upaniśhat source.

Encoded and proofread by Ruma Dewan

---

*Rudraksha Mahatmyam*

pdf was typeset on February 18, 2025

Please send corrections to *sanskrit@cheerful.com*